# संस्कृतवार्ता:

दिनाङ्क : 21/02/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- प्रधानमन्त्री नरेन्द्रमोदी श्वस्तनारभ्य मध्यप्रदेश-बिहार-असमप्रदेशानां त्रिदिवसीययात्रायां भविष्यति ।
- केन्द्रीयगृह-सहकारितामन्त्री अमितशाहः सूचितवान् यत् केन्द्रीय-पञ्जीयक- सहकारि-समित्याः प्रथमः क्षेत्रीय-कार्यालयः पुणे-नगरे उद्घाटयिष्यते ।
- भारत-पाकिस्तान-देशयो: सेना: जम्मू-कश्मीरे सीमासु शान्तिं स्थापयितुं एकविंशत्यधिक-द्विसहस्र-तमवर्षस्य युद्धविराम-सन्धेः सम्मानं कर्तुं सहमतिं प्रकटितवत्य: ।
- धावनक्रीडायाम्, गुलवीरसिंहेन बीयू-टेरियर-डी.एम.आर. चैलेन्ज-इत्येतस्यां पुरुषाणां पञ्चसहस्रमीटर-परिमितायां धावन स्पर्धायां कीर्तिमानं स्थापितम् ।

-------------------------------------

प्रधानमन्त्री-यात्रा

प्रधानमन्त्री श्री नरेन्द्र मोदी श्वस्तनारभ्य मध्यप्रदेश -बिहार - असमप्रदेशानां त्रिदिवसीययात्रायां भविष्यति । श्रीमोदी श्वः मध्यप्रदेशस्य छतरपुरजनपदे बागेश्वर-धाम-चिकित्सा एवं विज्ञान - अनुसन्धान-संस्थानस्य आधारशिलां स्थापयिष्यति । सोमवासरे प्रधानमन्त्री बिहारस्य भागलपुरक्षेत्रे गमिष्यति । अत्रावसरे सः प्रधानमन्त्री-किसान-योजनाया: एकोनविंशतितमां देयराशिं प्रकाशयिष्यति । अतः परं प्रधानमन्त्री श्रीमोदी झुगोर-बिनन्दिनी-कार्यक्रमे भागग्रहणार्थं गुवाहाटीं प्रति गमिष्यति । अयं कार्यक्रमः चायोद्योगस्य द्विशतवर्षाणां पूर्तेः प्रतीको वर्तते ।

-------------------------------------

अमितशाहः - पुणेनगरम्

केन्द्रीयगृह-सहकारितामन्त्री अमितशाहः सूचितवान् यत् केन्द्रीय-पञ्जीयक- सहकारि-समित्याः प्रथमः क्षेत्रीय-कार्यालयः पुणे-नगरे उद्घाटयिष्यते । असौ अद्य पुणेनगरे जनता-सहकारि-बैंक-इत्येतस्य हीरकोत्तार-जयन्त्या: समापन-समारोहे प्रवदन् आसीत्। असौ अवोचत् यत् एवमेव देशस्य सहकारि-बैंक-इत्येतान् वित्तीय समस्यातः निष्कासयितुं तेषां च साहाय्यार्थं समर्थनाय च एकं अन्ब्रेला इति सङ्घटनम् निर्मितमस्ति। एतत् सङ्घटनम् सर्वान् सहकारी-बैंकान् सुदृढीकर्तुं कार्यं सम्पादयिष्यति ।

अत्रावसरे मुख्यमन्त्री देवेन्द्रफडणवीसः उपमुख्यमन्त्रिणौ अजितपवार-एकनाथशिन्दे इत्येतौ केन्द्रीय-नागरिकोड्डयनराज्यमन्त्री मुरलीधर मोहोलः इत्यादयः च उपस्थिताः समभवन् ।

-------------------------------------

भारत-पाकिस्तान संघर्षविराम:

सीमासु शान्तिं स्थापयितुं, भविष्यकाले भ्रामक स्थितिं निवारयितुम् उपायान् अन्वेष्टुं च एक विंशत्यधिक द्वि सहस्र तमवर्षस्य युद्धविराम-सन्धेः सम्मानं कर्तुं भारत-पाकिस्तान- देशयो: सेना: सहमतिं प्रकटितवन्त: । नियन्त्रणरेखायां (एल्. ओ. सी.) अन्ताराष्ट्रियसीमायां च सद्यः एव सीमापारस्य गोलिकाप्रहारस्य, आई. ई. डी. घटनायाः तथा च अनेकानां घटनानाम् अनन्तरं उद्विग्नताम् न्यूनीकर्तुं भारतीय-पाकिस्तानी-सेनायाः प्रतिनिधयः ह्यः जम्मू-कश्मीरस्य पूञ्च् जनपदे ब्रिगेड्-कमाण्डर्-इत्येते: उपवेशनम् आचारिततवन्तः।

-------------------------------------

प्रधानः दिल्ली विश्वविद्यालयदीक्षान्तः

केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानः प्रोक्तवान् यत् भारतम् वैश्विकपटले नेतुं नवीन-राष्ट्रिय-शिक्षा-नीत्याः परिकल्पना संस्थापिता। नवदिल्ल्यां दिल्ली-विश्वविद्यालयस्य एकाधिकैक-शततमं दीशान्तसमारोहं सम्बोधयन् श्रीप्रधानः सबलेन प्रतिपादितवान् यत् समग्रे हि देशे नवीनायाः राष्ट्रिय-शिक्षा-नीत्याः क्रियान्वयनेन सप्तचत्वारिंशदधिक-द्विसहस्र-तमवर्षपर्यन्तं भारतं विकसितराष्ट्रं निर्मातुं शक्यते इति ।

श्रीप्रधानः विंशत्यधिक-द्विसहस्र तमवर्षीयायाः राष्ट्रिय-शिक्षा-नीत्याः साफल्येन अभिग्रहणे दिल्लीविश्वविद्यालयं भूरिशः प्रशंसितवान् । विश्वासंच प्रकटितवान् यत् अयं विश्वविद्यालयः

भविष्यकाले दिल्ली नगरं प्रमुखज्ञान-केन्द्रस्य रूपेण विनिर्मातुं महत्वपूर्ण-भूमिकां निभालयिष्यति।

-------------------------------------

महाकुम्भस्य उदन्त:

*फेब्रुवरी मासस्य षड्विंशे दिनाङ्के महाशिवरात्र्युत्सवम् उद्दिश्य प्रयागराजस्य स्वरूप-रानी-नेहरू-चिकित्सालये गहन-चिकित्सा-विभागे शयनासनानां संख्या सप्तचत्त्वारिंशदधिक-एकशत परिमितं यावत् समेधिता। अस्माकं संवाददाता विज्ञापितं यत् महाकुम्भावसरे ससमये चिकित्सा सुविधा-प्रदानार्थं उत्तर-प्रदेश-सर्वकारेण अयं पदक्षेपः सन्धारितः। मोतीलाल-नेहरू-चिकित्सकीय-महाविद्यालयस्य संचारमाध्यम - प्रभारिणा डॉ. संतोष सिंहेन विज्ञापितं यत् एस-आर-एन. इत्यस्मिन्*

*चिकित्सालये अभिघातोपचारस्य संवातकस्य च सौविध्यं चतुर्विंशति-होरां यावत् समुपलब्धं विद्यते । आपात्कालिक-चिकित्सा-दलानि-समेत्य एते विभागाः अत्याधुनिकोपकरणैः संवलिताः सन्ति। अपरत्र श्रध्दालूनां बृहत्तमां संख्याम् समाश्रित्य उत्तर प्रदेश-माध्यमिक-शिक्षा-परिषदा चतुर्विंशति-दिनाङ्के प्रयागराजे दशम-द्वादश-कक्ष्ययोः परीक्षा स्थगिता जाता। अवशिष्टेषु जनपदेषु परीक्षा: पूर्व-निर्धारित-कार्यक्रमानुसारि एव प्रचलिष्यन्त। (संस्कृतवार्ता कक्षतः जतिनशर्मा।*

-------------------------------------

प्रधानमन्त्री - मॉरीशस देशः

प्रधानमन्त्री नरेन्दर्मोदी आगामिनि मासे मॉरीशस देशस्य सप्तपञ्चाशत्तमे राष्ट्रिय-दिवस-समारोहे मुख्यातिथिः भविष्यति। मॉरीशस-देशस्य प्रधानमन्त्री नवीन- रामगुलामः मॉरिशसस्य संसदं सम्बोधयन् अवदत् यत् श्रीमोदी सदृशस्य जनस्य आतिथ्यं सौभाग्यकरं भविष्यति। अत्रावधौ असौ भारत-मॉरीशस-देशयोः मध्ये सुदृढ-स्थायि-सम्बन्धान् उल्लिखितवान् ।

-------------------------------------

यूरोपीयायोगाध्यक्षः

यूरोपीयायोगस्य अध्यक्षः उर्सुला-वॉन-डेर-लेयेन-इत्यसौ अस्य मासस्य सप्तविंशति-दिनाङ्कात् द्विदिवसीययात्रार्थं भारतं प्रत्याग-मिष्यति। इयं हि लेयेनइत्येतस्याः भारतं प्रति तृतीया यात्रा

स्यादिति। विदेशमन्त्रालयः सूचितवान् यत् यात्राप्रवासे प्रधानमन्त्री नरेन्द्रमोदी उर्सुला-वॉन-डेर-लेयेन-इत्यनेन साकं प्रतिनिधिमण्डलस्तरीयां वार्तां विधास्यति।

-------------------------------------

## कृषि-विज्ञान-मेला

पूसा-कृषि-विज्ञान मेलकः अद्य नवदिल्ल्यां समारब्धः। त्रिदिवसात्मकस्य अस्य मेलकस्य विषयः उन्नत-कृषि-विकसित-भारतम् इत्यस्ति। एतस्मिन् कृषकेभ्यः, छात्तेभ्यः, अन्य हितधारकेश्यश्च कृषिक्षेत्रे नवीनबीजप्रकाराः, प्रौद्योगिक्यश्च प्रदर्शिताः। केन्द्रीय-कृषिः-कृषक-कल्याण-मन्त्री शिवराजसिंह-चौहानः कार्यक्रमस्यास्य उद्घाटनम् अकरोत् । अवसरेऽस्मिन् श्री चौहानः प्रोक्तवान् यत् सर्वकारः सप्तचत्वारिंशदधिक-द्विसहस्त्रतमवर्ष यावत् भारतं विकसित-राष्ट्रत्वेन निर्मातुम् अनवरतप्रयासरतो विद्यतै।

श्री-चौहानेन उच्च-गुणवत्तायुक्त-बीजानां महत्त्वं प्रकाशयता कथितं यत् सर्वोत्तम-बीजानि कृषकाः यावच्छीघ्रं प्राप्नुयुः। वर्षेऽस्मिन् कृषिविज्ञान-मेलके मुख्याकर्षणस्य केन्द्रं भारतीय-कृषि-अनुसन्धान- संस्थानेन विकसितं अत्याधुनिक- बीज प्रकारकाणां प्रौद्योगिकीनाञ्च सजीव-प्रदर्शनम् इत्यस्ति। कृषिकृषक-कल्याणराज्यमन्त्रिणौ रामनाथठाकुर-भागीरथचौधरी इत्येतौ अस्य मासस्य चतुर्विंशे दिनाङ्के समापन सत्रस्य मुख्यातिथी भविष्यतः ।

-------------------------------------

## गुलवीरसिंहः - कीर्तिमानम्

धावनक्रीडायाम्, गुलवीरसिंहेन पुरुषाणां पञ्चसहस्त्रमीटर परिमिताम् आन्तरिक- धावनक्रीडां त्रयोदश निमेषानाम् अपि अल्पसमये सम्पूर्य ऐतिह्यं विरचितम् । एतेन साकमेव एषः प्रथमः भारतीयः जातः । बोस्टनइत्यत्र बीयू-टेरियर-डी.एम.आर. चैलेन्ज-इत्येतस्यां स्पर्धायां गुलवीरे कीर्तिमानं स्थापितम् । अनेन विजर्यन लयन साकमेव सितम्बरमासे भविष्यमाणायै जापानदेशस्य तोक्योनगरे विश्व-चैम्पियनशिपप्रतिस्पर्धायै प्रवेशः अधिगतः ।

।। इति वार्ता:।।